अनिवारिते "न वक्ता जरणा अनाकृत" इति ऋ० १,१४१,७, "अनाकृतः अनिवारित" इति भा० ।

**अनाक्रान्ता** स्त्री आक्रमितुमयोग्या सर्व्वतःकण्टकाद्दतत्वात् आ+क्रम—क्त न०त०। कण्टकारिवृक्षे। आक्रान्तभिन्ने त्रि०।

**अनाच्चारित** न० न आच्चारितः अपकृतः। अनपकृते। "अनाच्चारितपूर्व्वीय" इति कात्यासं०। "अनाच्चारितोऽनपकृत" इति प्रा०विवेकः।

**अनाग** त्रि० न आ सम्यग्गच्छति स्वर्गमनेन नागः अधर्म्मः न०ब०। पापरहिते "मित्रो नो अत्रादितिरनागान्" ऋ० १०,१२,८, "अनागान् अपापान्" इति भा० ।

**अनागत** त्रि० न आगतः। भविष्यत्कालवृत्तौ, "हेयं दुःखमनागतमिति पा०सू० आगतभिन्ने च "अनागतार्त्तवे" त्यमरः "तावद्भयस्य भेतव्यं यावद्भयमनागतमिति" हितो० "अनागतादिलिङ्गेन न स्यादनुमितिस्तदेति" भाषा० ।

**अनागतविधातृ** त्रि० अनागतस्य भविष्यतः अनिष्टस्य विधाता प्रतिविधानकर्त्ता। आगामिदुःखस्य लिङ्गद्वारानुमानेन तन्निवारणोपायानुष्ठातरि "अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्योविनश्यतीति" हितो०।

**अनागताबाध** अनागतः आबाधः दुःखम्। भाविदैहिकादिदुःखे। यदाचरणेन भाविदुःखानुत्पादस्तादृशा उपायाः सुश्रुते दर्शिता यथा "अथातोऽनागताबाधप्रतिषेधनीयं व्याख्यास्याम"त्युपक्रम्य। "उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता। धीमता यदनुष्ठेयं तत् सर्व्वं सम्प्रवक्ष्यते॥ तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरिणाहमृज्वग्रथितमव्रणम्। अयुग्मग्रन्थि यच्चापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत्॥ कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बश्च तिक्तके श्रेष्ठः, कषाये खदिरस्तथा॥ मधूको मधुरे श्रेष्ठः, करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च॥ चूर्णेन तेजोवत्याश्च दन्तान्नित्यं विशोधयेत्,। एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च॥ दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्॥ तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमन्नाभिरुचिं सौमनस्यं करोति च॥ न खादेद्गलताल्वोष्ठजिह्वारोगसमुद्भवे। अथास्यपाके श्वासे च कासहिक्कावमीषु च॥ दुर्ब्बलो जीर्णभक्तश्च मूर्च्छार्त्तो मदपीड़ितः। शिरोरुगार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः॥ अर्द्दिती कर्णशूली च दन्तरोगी च मानवः,। जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च॥ तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम्। मुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं सुखम्,॥ दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम्। क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः॥ भिन्नोदककषायेण तथैवामलकस्य वा। प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा॥ निलीकां मुखशोषञ्च पिड़कां व्यङ्गमेव च। रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत्,॥ सुखं लघु निरीक्षेत दृढ़ं पश्यति चक्षुषा,। मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्॥ दाहकण्डूमलघ्नञ्च दृष्टिक्लेदरुजापहम्,। अक्ष्णोरूपावहञ्चैव सहते मारुतातपौ॥ न नेत्ररोगा जायन्ते तस्मादञ्जनमाचरेत्। भुक्तवान् शिरसा स्नातः श्रान्तश्छर्दनवाहनैः॥ रात्रौ जागरितश्चापि नाञ्ज्याज्ज्वरित एव च,। कर्पूरजातिकक्कोललवङ्गकटुकाह्वयैः॥ सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभम्। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्॥ हनुदन्तस्वरमलजिह्वेन्द्रियविशोधनम्। प्रसेकशमनं हृद्यं गलामयविनाशनम्। पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे। रक्तपित्तक्षतक्षीणतृष्णामूर्च्छापरीतिनाम्॥ रूक्षदुर्ब्बलमर्त्यानां न हितं चास्रशोषिणाम्,। शिरोगतांस्तथा रोगान् शिरोऽभ्यङ्गोऽपकर्षति॥ केशानां मार्द्दवं दैर्घ्यं बहुत्वं स्निग्धकृष्णताम्। करोति शिरसस्तृप्तिं सुत्वक्कमपि चाननम्॥ सन्तर्पणं चेन्द्रियाणां शिरसः प्रतिपूरणम्। मधूकं क्षीरशुक्ला च सरलं देवदारु च। क्षुद्रकं पञ्चनामानं समभागानि संहरेत्। तेषां कल्ककषायाभ्यां चक्रतैलं विपाचयेत्॥ सदैव शीतलं जन्तोर्मूर्ध्नि तैलं प्रदापयेत्,। केशप्रसाधनी केश्या रजोजन्तुमलापहा,॥ हनुमन्याशिरःकर्णशूलघ्नं कर्णपूरणम्,। अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः॥ धातूनां पुष्टिजननो मृजावर्णबलप्रदः,। सेकः श्रमघ्नोऽनिलहृद्भग्नसन्धिप्रसाधकः॥ क्षताग्निदग्धाभिहतविघृष्टानां रुजापहः। जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः॥ तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते। शिरामुखैरोमकूपैर्धमनीभिश्च तर्पयन्॥ शरीरबलमाधत्ते युक्तः स्नेहोऽवगाहने। तत्र प्रकृतिसात्म्यर्त्तुदेशदोषविकारवित्॥ तैलं घृतं वा मतिमान् युञ्ज्यादभ्यङ्गसेकयोः। केवलं सामदोषेषु न कथञ्चन योजयेत्॥ तरुणज्वर्य्यजीर्णी च नाभ्यक्तव्यौ कथञ्चन। तथाविरिक्तो वान्तश्च निरूढो यश्च मानवः॥